अष्टमः पाठः

# गुरूपदेशः अजलं स्नानम्

उज्जयिनी नगरे तारापीडः नाम एकः नृपः आसीत्। तस्य महामात्यः शुकनासः परमविद्वान् नीतिज्ञः च आसीत्। चन्द्रापीडः तु राज्ञः ज्येष्ठः पुत्रः अभवत्। यदा सः विद्याध्ययनं समाप्य प्रतिनिवृत्तः तदा राजा तस्य युवराजपदे अभिषेकं कर्त्तुम् ऐच्छत्। सः अभिषेकसामग्रीं सङ्ग्रहीतुं द्वारपालान् आदिशत्। यौवराज्याभिषेकात् पूर्वं राजकुमारः चन्द्रापीडः दर्शनार्थम् आचार्यं शुकनासम् उपगतः। तदा आचार्यः शुकनासः अवदत्-''यद्यपि त्वम् अधीतशास्त्रः, ज्ञेयस्य च ज्ञाता असि, अल्पः अपि उपदेशः ते न अपेक्षते, तथापि नवयौवनस्य, राज्यसुखस्य, लक्ष्म्याः च मदः दारुणः भवति। अतः सम्प्रति त्वम् मद्वचनानि सावधानतया शृणु।'' ततः आचार्यः शुकनासः तस्य शुभम् इच्छन् तम् सस्नेहम् उपदिष्टवान्। एषः शुकनासोपदेशः 'कादम्बरी' इति ग्रन्थे प्रसिद्धः।



तात चन्द्रापीड ! गुरूपदेशश्च नाम पुरुषाणाम् अखिलमलप्रक्षालनक्षमम् अजलं स्नानम् । अयमेव ते कालः उपदेशस्य । भवादृशा एव भवन्ति भाजनान्युपदेशानाम् । विशेषेण राज्ञाम् । विरला हि तेषामुपदेष्टारः । अहङ्कारमूला हि राजप्रकृतिः । प्रतिशब्दक इवानुगच्छति राजवचनम् जनो भयात् । अपि च जन्मजातम् ऐश्वर्यम्, अभिनवयौवनत्वम्, अप्रतिमरूपत्वञ्चेति महतीयं खल्वनर्थपरम्परा सर्वा ।

आलोकयतु तावत् कल्याणाभिलाषी भवान् लक्ष्मीमेव प्रथमम् । इयं हि लब्धापि दुःखेन परिपाल्यते । न परिचयं रक्षति । नाभिजनमीक्षते । न कुलक्रमम् अनुवर्तते, न शीलं पश्यति, नाचारं परिपालयति, न सत्यम् अनुबुध्यते, न वैदग्ध्यं गणयति । विनीतं पातकिनमिव नोपसर्पति । तरङ्गबुद्बुदवत् हि चञ्चला । यथा यथा चेयं चपला दीव्यते तथा तथा दीपशिखेव कज्जलमलिनमेव कर्म केवलम् उद्वमति ।

कुमार ! राज्यतन्त्रेऽस्मिन् महामोहकारिणि यौवने तथा प्रयतेथाः यथा नोपहस्यसे जनैः, न निन्द्यसे साधुभिः, न धिक्क्रियसे गुरुभिः, नोपालभ्यसे सुहृद्भिः, न वञ्च्यसे धूर्तैः ।

कामं भवान् प्रकृत्यैव धीरः, पित्रा च महता प्रयत्नेन समारोपितसंस्कारः । तथापि भवद्गुणसन्तोषः मामेवं मुखरीकृतवान् । "सर्वथा कल्याणैः पित्रा क्रियमाणम् अनुभवतु भवान् नवयौवराज्याभिषेकमङ्गलम् ।"

## *अनुप्रयोगः*

**1. अधोलिखितपदानि शुद्धोच्चारणपूर्वकम् उच्चैः पठत –**

गुरूपदेशश्च, तेषामुपदेष्टारः, प्रकृत्यैव, कल्याणाभिलाषी, ऐश्वर्यम्, सुहृद्भिः

**2.(क) वर्णवियोजनं क्रियताम् –**

यथा रक्षति – र् + अ + क् + ष् + अ + त् + इ

प्रथमम् –

मङ्गलम् –

पित्रा –

**(ख) वर्ण-संयोजनं क्रियताम् –**

यथा – च् + अ + ञ् + च् + अ + ल् + आ = चञ्चला

– त् + अ + र् + अ + ङ् + ग् + अः = ......................

– स् + अ + र् + व् + आ = ......................

– र् + आ + ज् + ञ् + आ + म् = ......................

**3. अधः सन्धिरहितपदानां सन्धियुक्तानि रूपाणि लिखत –**

| | | | | |
|---|---|---|---|---|
| यथा – गुरु | + | उपदेशः | = | गुरूपदेशः |
| कल्याण | + | अभिलाषी | = | .................. |
| लब्धा | + | अपि | = | .................. |
| न | + | आचारम् | = | .................. |
| महती | + | इयम् | = | .................. |
| भाजनानि | + | उपदेशानाम् | = | .................. |
| खलु | + | अनर्थपरम्परा | = | .................. |
| च | + | इयम् | = | .................. |
| दीपशिखा | + | इव | = | .................. |

**4. अधः प्रदत्तविग्रहपदानां स्थाने समस्तपदानि पाठादेव चित्वा लिखत –**

| *विग्रहपदानि* | *समस्तपदानि* |
|---|---|
| यथा – अखिलं मलम् = अखिलमलम् | अखिलमलम् |
| प्रक्षालने क्षमम् | .................................. |
| कुलस्य क्रमम् | .................................. |
| अनर्थानाम् परम्परा | .................................. |
| दीपस्य शिखा इव | .................................. |
| राज्ञाम् प्रकृतिः | .................................. |
| अहङ्क.ारः एव मूलम् यस्याः सा | .................................. |
| कज्जलम् इव मलिनम् | .................................. |
| नवं यौवराज्यम् नवयौवराज्यस्य अभिषेकस्य मङ्गलम् | .................................. |

**5. विनयः विनीता च परस्परं वार्तालापं कुरुतः। विनयः कर्तृवाच्ये वदति विनीता च कर्मवाच्ये भाववाच्ये वा। अत्र उदाहरणम् अनुसृत्य विनीतायाः कथनानि लिखत –**

यथा – विनयः – विनीते ! किं तत्र आदित्यः वेदम् पठति ?

विनीता – आम्, आदित्येन वेदः पठ्यते।

विनयः – किं त्वम् अत्र लेखम् लिखसि ?

| | | |
|---|---|---|
| विनीता | – | आम्, अत्र मया लेखः लिख्यते। |
| विनयः | – | किं त्वम् विद्यालयं न गच्छसि ? |
| विनीता | – | नहि ........... ............... न ................. । |
| विनयः | – | किं गुरुः माम् धिक्करोति ? |
| विनीता | – | नहि, .......... .............. न .................. । |
| विनयः | – | किम् बालाः माम् उपहसन्ति ? |
| विनीता | – | नहि, .......... .............. न ..................। |
| विनयः | – | किम् मित्राणि माम् निन्दन्ति? |
| विनीता | – | नहि, .......... .............. न ..................। |
| विनयः | – | धन्यवादः। अधुना अहम् पादपान् सिञ्चामि। |
| विनीता | – | अस्तु, ......... अपि ............ सिच्यन्ते। |

**6. निर्दिष्टशब्दरुपैः वाक्यपूर्तिं कुरुत –**

यथा – <u>अयम्</u> एव कालः उत्सवस्य। (इदम् – प्रथमा)

(क) अस्य उत्सवस्य .................. सज्जा दर्शनीया। (सर्व – प्रथमा)

(ख) ............ अपि आलोकयतु शोभाम्। (भवत् – प्रथमा)

(ग) हे मित्र ! .................उत्सवपथम् निर्दिशतु। (अस्मद् – द्वितीया)

(घ) ........................ रमणीया वेला समारोहस्य। (इदम् – प्रथमा)

(ङ) अत्र .......................... अपि मया सह उपविश। (युष्मद् – प्रथमा)

**7. निर्दिष्टधातुरूपैः वाक्यानि पूरयत –**

यथा – नृपः प्रजाः <u>पालयति</u>। (पाल् – लट्)

(क) सैनिकाः देशं ........., .................... (रक्ष् – लट्)

(ख) राजसत्तायाः मदं को न .......................... (ज्ञा – लट्)

(ग) राज्ञाम् उपदेष्टारः विरलाः एव ......................... (भू – लट्)

(घ) मूर्खः विद्वांसम् न ............................... (गण् – लट्)

(ङ) राजकुमारः गुरोः उपदेशं .......................... (श्रु - लट्)

(च) अहम् प्रसन्नः .......................... (अस् - लट्)

(छ) त्वम् विजयी .......................... (भू - लोट्)

(ज) वयम् सदा जनहितम् एव .......................... (कृ - लृट्)

**8. अधोलिखितप्रश्नानाम् उत्तरणि संस्कृतभाषया लिख्यन्ताम् -**

(क) पुरुषाणाम् अखिलमलप्रक्षालने समर्थः कः भवति ?

(ख) राजप्रकृतिः कीदृशी भवति ?

(ग) लब्धापि दुःखेन का परिपाल्यते ?

(घ) लक्ष्मीः किमिव चञ्चला भवति ?

(ङ) लक्ष्मीः दीपशिखेव किम् उद्वमति ?

(च) जनः भयात् राजवचनं किमिव अनुगच्छति ?

(छ) पित्रा च समारोपितसंस्कारः कः आसीत् ?

(ज) आचार्यः शुकनासः युवराजाय कां शुभकामनाम् अयच्छत् ?

(झ) अयं पाठः कस्माद् ग्रन्थात् सङ्गृहीतः, कश्च तस्य लेखकः ?

**9. पदानाम् अर्थमेलनं क्रियताम् -**

| | अ | आ |
|---|---|---|
| | ***पदानि*** | ***अर्थाः*** |
| यथा | *अखिलम्* | *सकलम्* |
| (क) | भाजनानि | (i) विद्वत्ताम् |
| (ख) | प्रतिशब्दकः | (ii) कुलीनम् |
| (ग) | अभिजनम् | (iii) पात्राणि |
| (घ) | वैदग्ध्यम् | (iv) कल्याणम् |
| (ङ) | सुहृद्भिः | (v) प्रतिध्वनिः |
| (च) | मङ्गलम् | (vi) मित्रैः |

## 10. कथयन्तु 'आम्' अथवा 'न'

(क) चन्द्रापीडः तारापीडस्य ज्येष्ठः पुत्रः आसीत्।

(ख) चन्द्रापीडः मूर्खः आसीत्।

(ग) गुरोः उपदेशः अजलं स्नानं कथ्यते।

(घ) राज्ञां स्वभावः अहङ्कारयुक्तः भवति।

(ङ) प्राप्ता लक्ष्मीः सुखेन रक्ष्यते।

(च) लक्ष्मीः दीपशिखेव कज्जलं न मुञ्चति।

(छ) आचार्यः शुकनासः यौवराज्याभिषेकात् पूर्वं चन्द्रापीडम् उपदिष्टवान्।

(ज) चन्द्रापीडः तु गुरुणा समारोपितसंस्कारः आसीत्।

## 11.(क) समक्षम् कोष्ठकाद् विशेषणपदं चित्वा रिक्तस्थानं पूरयत

(i) .................... ऐश्वर्यम्। (राज्ञः / जन्मजातम्)

(ii) .............................. यौवनत्वम्। (अभिनवम् / चन्द्रापीडस्य)

(iii) पिता पुत्रं ........................ प्रयत्नेन संस्कारयुक्तम् अकरोत्। (उपदेशं दत्त्वा / महता)

## (ख) रेखाङ्कितं सर्वनामपदं कस्मै प्रयुक्तम्?

(i) अयमेव <u>ते</u> कालः उपदेशस्य। ..........................

(ii) विरलाः हि <u>तेषाम्</u> उपदेष्टारः। ..........................

(iii) <u>इयम्</u> हि लब्धापि दुःखेन परिपाल्यते। ..........................

**(ग)** यौवनं धनसम्पत्तिः प्रभुत्वमविवेकिता।
एकैकमप्यनर्थाय किमु यत्र चतुष्टयम्॥
इति श्लोकस्य भावमूला का पङ्क्तिः विद्यते पाठे ? पठित्वा अवबुध्य च लिखत।

## 12. द्वितीये अनुच्छेदे लक्ष्म्याः दोषाः वर्णिताः। तेषु केवलं पञ्चदोषान् अत्र वर्णयत

यथा लक्ष्मीः परिचयं न रक्षति।

(i) ....................................................................

(ii) ..................................................................

(iii) ..................................................................

(iv) ..................................................................

(v) ..................................................................

# पाठविकासः

## (क) लेखकपरिचय :

महाकविः बाणभट्टः राज्ञः हर्षवर्धनस्य राज्यकविः आसीत् । हर्षवर्धनस्य शासनकालः 606 ईसवीतः 648 ई॰ पर्यन्तम् आसीत् । हर्षवर्धनः कन्नौजस्य राजा अभवत् । अतः सप्तमशताब्द्याः पूर्वार्द्धे बाणस्य स्थिति कालः मन्यते । अयं वत्सगोत्रोत्पन्नः द्विजः आसीत् । अस्य पिता चित्रभानुः माता च राज्यदेवी आस्ताम् । दुर्भाग्येन असौ बाल्यावस्थायामेव मातृपितृविहीनः जातः । ततः सः देशाटनाय निर्गतः । यदा बाणः गृहं प्रति निवृत्तः तदा सः विद्वान् परिपक्वबुद्धिः अनुभवी चासीत् । अनेन रचिताः चत्वारः ग्रन्थाः सन्ति –

1. हर्षचरितम् (आख्यायिका)
2. कादम्बरी (कथा)
3. चण्डीशतकम् (पद्यकाव्यम्)
4. पार्वतीपरिणयः (नाटकम्)

बाणभट्टः संस्कृतगद्यकाव्यस्य सम्राट् अस्ति । उक्तं च–

नवोऽर्थो जातिरग्राम्या श्लेषोऽश्लिष्टः स्फुटो रसः ।
विकटाक्षरबन्धश्च कृत्स्नमेकत्र दुर्लभम् ।। (हर्षचरितम्)

हर्षवर्धनस्य मृत्योः अनन्तरं बाणः स्वग्रामं प्रीतिकूटं निवृत्तः । तत्रैव साहित्यरचनां कृतवान् ।

## (ख) रचनापरिचयः

(i) 'हर्षचरितम्' ऐतिहासिकतथ्यप्रधानः आख्यायिकाग्रन्थः अस्ति । राज्ञः हर्षवर्धनस्य जीवनवृत्तमेव तत्र वर्णितम् ।

(ii) 'कादम्बरी' – 'कादम्बरी' संस्कृतसाहित्यस्य सर्वोत्कृष्टा प्रेमगाथा अस्ति । इयं हि कविकल्पनामूलक-प्रेमकथा अस्ति । एषा तु चन्द्रापीडस्य पुण्डरीकस्य च जन्मत्रयस्य कथा वर्तते । अस्य कथानकस्य प्रारम्भः एवं भवति – प्राचीनकाले शूद्रकः विदिशायाः शासकः आसीत् । यदा स राजसभायाम् उपविष्टः आसीत् तदैव काचित् चाण्डालकन्या वैशम्पायननामकं शुकं राज्ञे समर्पितवती । शुकः मानुषीं वाणीं वक्तुमपि कुशलः आसीत् । तस्य

पूर्वजन्मनः स्मरणमपि आसीत्। चकितः राजा यदा शुकस्य वृत्तान्तम् ज्ञातुम् ऐच्छत् तदा सः शुकः जाबालिमुनिना ज्ञापितं स्वपूर्वजन्मनः वृत्तान्तं श्रावयति–

उज्जयिन्यां तारापीडः नृपः आसीत् तस्य राज्ञ्याः नाम विलासवती आसीत्। तयोः पुत्रस्य नाम चन्द्रापीडः आसीत्। तारापीडस्य महामन्त्री शुकनासः परमविद्वान् आसीत्। तस्य पुत्रस्य नाम वैशम्पायनः अभवत्। तयोः कुमारयोः परस्परं गाढमैत्री आसीत्। यदा राजकुमारः चन्द्रापीडः विद्याध्ययनं समाप्य प्रतिनिवृत्तः तदा तस्य युवराजस्य अभिषेककाले महामन्त्रिणा शुकनासेन तस्मै चन्द्रापीडाय यः उपदेशः प्रदत्तः स एव 'शुकनासोपदेशः' इति नाम्ना प्रसिद्धः जातः। अतः शुकनासोपदेशः कादम्बरीग्रन्थस्य एव एकं प्रमुखं स्थलम् अस्ति।

कादम्बरीरसभरेण समस्त एव
मत्तो न किञ्चिदपि चेतयते जनोऽयम्।।